# ॥ वाल्मीकि रामायण ॥

## ६ युद्धकाण्ड

### अध्याय ४३

धूम्राक्षं निहतं श्रुत्वा रावणो राक्षसेश्वरः ।
बलाध्यक्षमुवाचेदं कृताञ्जलिमुपस्थितम् ॥ १॥

शीघ्रं निर्यान्तु दुर्धर्षा राक्षसा भीमविक्रमाः ।
अकम्पनं पुरस्कृत्य सर्वशस्त्रप्रकोविदम् ॥ २॥

ततो नानाप्रहरणा भीमाक्षा भीमदर्शनाः ।
निष्पेतू राक्षसा मुख्या बलाध्यक्षप्रचोदिताः ॥ ३॥

रथमास्थाय विपुलं तप्तकाञ्चनकुण्डलः ।
राकसैः संवृतो घोरैस्तदा निर्यात्यकम्पनः ॥ ४॥

न हि कम्पयितुं शक्यः सुरैरपि महामृधे ।
अकम्पनस्ततस्तेषामादित्य इव तेजसा ॥ ५॥

तस्य निधावमानस्य संरब्धस्य युयुत्सया ।
अकस्माद्दैन्यमागच्छद्धयानां रथवाहिनाम् ॥ ६॥

व्यस्फुरन्नयनं चास्य सव्यं युद्धाभिनन्दिनः ।
विवर्णो मुखवर्णश्च गद्गदश्चाभवत्स्वरः ॥ ७॥

अभवत्सुदिने चापि दुर्दिने रूक्षमारुतम् ।
ऊचुः खगा मृगाः सर्वे वाचः क्रूरा भयावहाः ॥ ८॥

स सिंहोपचितस्कन्धः शार्दूलसमविक्रमः ।
तानुत्पातानचिन्त्यैव निर्जगाम रणाजिरम् ॥ ९॥

तदा निर्गच्छतस्तस्य रक्षसः सह राक्षसैः ।
बभूव सुमहान्नादः क्षोभयन्निव सागरम् ॥ १०॥

तेन शब्देन वित्रस्ता वानराणां महाचमूः ।
द्रुमशैलप्रहरणा योद्धुं समवतिष्ठत ॥ ११॥

तेषां युद्धं महारौद्रं सञ्जज्ञे कपिरक्षसाम् ।
रामरावणयोरर्थे समभित्यक्तजीविनाम् ॥ १२॥

सर्वे ह्यतिबलाः शूराः सर्वे पर्वतसंनिभाः ।
हरयो राक्षसाश्चैव परस्परजिघंसवः ॥ १३॥

तेषां विनर्दातां शब्दः संयुगेऽतितरस्विनाम् ।
शुश्रुवे सुमहान्क्रोधादन्योन्यमभिगर्जताम् ॥ १४॥

रजश्चारुणवर्णाभं सुभीममभवद्भृशम् ।
उद्धूतं हरिरक्षोभिः संरुरोध दिशो दश ॥ १५॥

अन्योन्यं रजसा तेन कौशेयोद्धूतपाण्डुना ।
संवृतानि च भूतानि ददृशुर्न रणाजिरे ॥ १६॥

न ध्वजो न पताकावा वर्म वा तुरगोऽपि वा ।
आयुधं स्यन्दनं वापि ददृशे तेन रेणुना ॥ १७॥

शब्दश्च सुमहांस्तेषां नर्दतामभिधावताम् ।
श्रूयते तुमुले युद्धे न रूपाणि चकाशिरे ॥ १८॥

हरीनेव सुसङ्क्रुद्धा हरयो जघ्नुराहवे ।
राक्षसाश्चापि रक्षांसि निजघ्नुस्तिमिरे तदा ॥ १९॥

परांश्चैव विनिघ्नन्तः स्वांश्च वानरराक्षसाः ।
रुधिरार्द्रं तदा चक्रुर्महीं पङ्कानुलेपनाम् ॥ २०॥

ततस्तु रुधिरौघेण सिक्तं व्यपगतं रजः ।
शरीरशवसङ्कीर्णा बभूव च वसुन्धरा ॥ २१॥

द्रुमशक्तिशिलाप्रासैर्गदापरिघतोमरैः ।
हरयो राक्षसास्तूर्णं जघ्नुरन्योन्यमोजसा ॥ २२॥

बाहुभिः परिघाकारैर्युध्यन्तः पर्वतोपमाः ।
हरयो भीमकर्माणो राक्षसाञ्जघ्नुराहवे ॥ २३॥

राक्षसाश्चापि सङ्क्रुद्धाः प्रासतोमरपाणयः ।
कपीन्निजघ्निरे तत्र शस्त्रैः परमदारुणैः ॥ २४॥

हरयस्त्वपि रक्षांसि महाद्रुममहाश्मभिः ।
विदारयन्त्यभिक्रम्य शस्त्राण्याच्छिद्य वीर्यतः ॥ २५॥

एतस्मिन्नन्तरे वीरा हरयः कुमुदो नलः ।

मैन्दश्च परमक्रुद्धश् चक्रुर्वेगमनुत्तमम् ॥ २६॥

ते तु वृक्षैर्महावेगा राक्षसानां चमूमुखे ।
कदनं सुमहच् चक्रुर्लीलया हरियूथपाः ॥ २७॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com